International Journal of Scientific Research in Science and Technology
© 2018 IJSRST | Volume 4 | Issue 11 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# शिक्षादर्शनयोः सम्बन्धः

Prof. N. Latha
Professor,Department of Education, National Sanskrit University, Tirupati.

शिक्षादर्शनयोः मध्ये घनिष्ठसम्बन्धः वर्तते । शिक्षायाः निश्चितोद्देश्यम् अस्ति । यच्च दर्शनसाहाय्येन विकसेत् । दर्शनस्य कार्यम् अन्तर्निहितशक्तेः प्रकाशनम् एवं निहितसत्यं विज्ञाय व्यक्तिः समस्यां दूरीकुर्यात्। परन्तु शिक्षा क्षमतां प्रददाति, एवं क्षमतया सत्यान्वेषणद्वारा सत्यं विज्ञाय एतेन समस्यादूरीकरणे समर्थः भवति ।

शिक्षां विहाय व्यक्तिः दर्शनं न ज्ञास्यति । उदाहरणार्थम् अशिक्षितः अथवा अपठितस्य कस्यचन जीवनदर्शनम् अन्यथा भवति । सः तस्य दर्शनस्य आधारम् उद्देश्यं वा न जानीयात् ।

दर्शने विचारस्य प्राधान्यं भवति शिक्षायां कार्यप्रणाली योजना च अस्ति । दर्शनं साध्यम्, शिक्षा साधनं भवति । दर्शनं जीवनस्य आधारभूतसमस्यां प्रकाशयति । एवं सामाजिकजीवने भिन्नताकारणेन अनेकप्रकारकदर्शनानि भवन्ति । भारतीयविचारेषु व्यक्तिः ईश्वरांशसम्भूतः इति । एवं जीवात्मा परमात्मनः अंशः, मानवः दैविकः न तु जैविकः ।

---

**शिक्षायाः उद्देश्यम् एवं दर्शनम्-** शिक्षायाः उद्देश्यं जीवनोद्देश्यस्य आधारितं भवति । जीवनोद्देश्यं समाजेन संस्कृत्या च प्रभावितं भवति । अतः सामाजिकदर्शनस्य योगदानं महद्रूपेण वर्तते । एवं सति दर्शनं शिक्षायाः उद्देश्यं प्रभावयति इति वक्तुं शक्यते । व्यक्तिः समाजः इति उभयोः कृते स्वस्वजीवनदर्शनं भवेदेव । कदाचित् उभयोः जीवनदर्शने समानता भिन्नता वा अवश्यं भवेत् । उभे जीवनदर्शने शिक्षामेव प्रभावयतः। एवं शिक्षायाः स्वरूपनिर्धारणे उभेऽपि अत्यन्तं प्रभावपूर्णं योगदानं दत्तः ।

**पाठ्यक्रमः एवं दर्शनम्** - किं पाठनीयं किं न पाठनीयमिति विचारः व्यक्तिः स्वदार्शनिकाधारेण ददाति । पाठ्यसामग्रीणां निर्माणं, निश्चितादर्शाः, शैक्षिकलक्ष्याणि च परिलक्ष्य क्रियन्ते ।

**विद्यालयप्रबन्धः एवं दर्शनम्** - अत्र भिन्नमंतानि भवन्ति । कदा विद्यालयस्य प्रारम्भः अथवा उद्घाटनं, कदा पिधानं करणीयम् इत्याद्यंशान् प्रबन्धविषयेण पर्यालोच्यते ।

**अनुशासनम्** - दर्शनदृष्ट्या अनुशासनं विचार्यते । दर्शनं वैचारिकं व्यावहारिकरूपं जीवनदर्शनस्य व्यावहारिकशिक्षा एव । शिक्षायाः सैद्धान्तिकविवेचनं दर्शनं भवति । शिक्षायाः उद्देश्यं, शिक्षणविधिः, अनुशासनं, शिक्षणसामग्री इत्यादीनां तात्त्विकविवेचनं दर्शनपरिधौ भवन्ति । शैक्षिकसमस्यानां विवरणं तु सैद्धान्तिक-विवेचनमेव एतेन शिक्षायाः प्रगतिः भवति । अस्यां शिक्षा तथा दर्शनस्य घनिष्ठः सम्बन्धः भवति । John Dewey महोदयेन दर्शनं शिक्षायाः सामान्यसिद्धान्तत्वेन अङ्गीकृतम् ।

**यथार्थवादशिक्षायाः उद्देश्यानि -**

- बालकस्य कृते समाजस्य सम्पूर्णज्ञानं दातव्यम्– बालकः सामाजिकपरिस्थितेः एवं सामाजिक– संघटनस्य प्राकृतिवातावरण च ज्ञानं सम्पाद्य तस्यानुकूलं अनुरूपं च कार्य कुर्यात् ।
- ज्ञानं नाम विवेकसम्पादनम् । तत् पदार्थदर्शनद्वारा जन्यते। बालकः वास्तविकपदार्थज्ञानं प्राप्नुयात् ।
- इन्द्रियज्ञानद्वारा प्राप्तपदार्थान् विश्लिष्य विवेकद्वारा यथार्थज्ञानं प्राप्नुयात्। बालकः वास्तविकप्रपञ्चम् अन्विष्य लौकिकव्यावहारिकजीवनस्य रहस्यं जानीयात् ।

**पाठ्यक्रमः-** विभिन्नपाठ्यविषयाः । छात्राः अभीष्टविषयं स्वयोग्यतानुसारम् अभिरुच्यनुसारं च चीयन्ते । तेभ्यः अधिकरूपेण उपयोगपूर्वकं विषयान् पठितुम् अवसरः कल्पनीयः । विषयाणां चयने शिक्षकस्य मार्गदर्शनमपि भवेत् । सामाजिकावश्यकतानुगुणं विषयाणां चयनं भवेत् । आधुनिकभाषाः पठनीयाः । वैज्ञानिकशिक्षणस्यावसरः कल्पनीयः यतः विज्ञानमेव यथार्थप्रपञ्चस्य परिचयं दद्यात्।

**शिक्षणविधिः** –

- ✓ विषयस्वरूपं विज्ञाय तदनुनिश्चितविधिः पालनीयः ।
- ✓ विषयस्य स्पष्टीकरणं तु शिक्षकेण विश्लेषण विवेचनपूर्वकं व्याख्यापद्धतिद्वारा कर्तव्यम् ।
- ✓ ज्ञानं वस्तुनिष्ठं भवति न तु व्यक्तिनिष्ठम् । अतः कक्ष्यायां तथ्यानां (Principles) प्रति बलं दातव्यम् ।
- ✓ शिक्षणसन्दर्भे सीमितमात्रम् अभिव्यक्तीकरणस्य प्राधान्यं दातव्यम् ।
- ✓ शिक्षणस्य प्रमुखमाध्यमं तु भाषा एव । पदार्थः यथार्थः भवति । अतः भाषणसमये शब्दः प्रतीकमात्रेण (Symbol) भवति ।
- ✓ शब्दस्य पदार्थसाहचर्येण अर्थः उत्पद्यते । एवं शब्दः मूलवस्तु, शिक्षायां शब्दार्थौ प्रमुखस्थानं वहतः।

**यथार्थवादे शिक्षणविधिः**

- ✓ प्रत्यक्षप्रमाणं प्रति प्राध्यान्यं दातव्यम् ।
- ✓ प्रत्ययानां प्राधान्यं यथार्थज्ञानसम्पादनाय दातव्यम् ।
- ✓ तथ्यानां निरूपणे शिक्षकः समयं पालयति ।
- ✓ छात्राः विवेकपूर्वकं तथ्यान् अथवा सैद्धान्तिकज्ञानं प्राप्नुयुः ।

**शिक्षकः**

- ✓ शिक्षकस्य कृते लक्ष्यं, दृष्टिकोणं, चरित्रं च विशेषरूपेण भवेत् ।
- ✓ ज्ञानं तथा अनुभवं प्रति तस्य विशिष्टधारणा भवेत् ।

**शिक्षकस्य गुणाः**

- ✓ विज्ञाने अचञ्चलविश्वासः भवति । प्रत्येकं वस्तु अपि वैज्ञानिकदृष्टिकोणात् ज्ञातुं प्रयत्नः क्रियते । कल्पनापेक्षया वस्तुनिष्टज्ञानं प्रति एवम् आवश्यकज्ञानं प्रति अभिरुचिं प्रदर्शयत् ।

- ✓ विश्वस्य समस्ततत्त्वानां ज्ञानं न प्राप्तुं शक्यते । विशेषतत्त्वं तु ज्ञातुं शक्यते । अत: शिक्षक: विशिष्टतत्त्वज्ञानसम्पादने मग्न: भवेत् ।
- ✓ छात्राभिरुचि: आवश्यकता:, इच्छां ज्ञात्वा वैज्ञानिकपद्धत्या परिपुष्टिं कुर्यात् ।
- ✓ शिक्षक: यथार्थरूपेण तटस्थभावनया वस्तुन: विवेचनं कुर्यात् ।
- ✓ छात्राभिरुचि: आवश्यकता:, इच्छां ज्ञात्वा वैज्ञानिकपद्धत्या परिपुष्टिं कुर्यात् ।
- ✓ शिक्षक: यथार्थरूपेण तटस्थभावनया वस्तुन: विवेचनं कुर्यात् ।
- ✓ शिक्षक: बालमनोविज्ञानं, किशोरमनोविज्ञानं ज्ञात्वा तदनुसरलरूपेण आकर्षणपूर्वकं व पाठयेत् ।

**छात्र**:- शिक्षणप्रक्रियायां छात्रस्य सर्वाधिकमहत्वमस्ति । समस्तशिक्षा: छात्रकेन्द्रिता: । स: अनेक- रुचि: भावना-इच्छा-शक्तिभिश्च परिपूर्ण: भवति । शिक्षायाम् अस्य आदर: भवति । वैज्ञानिकविधिद्वारा तस्य शक्तीनां विकास: यथोचितं करणीय: । स: स्वतन्त्र: शिक्षकस्य मार्गदर्शनं च भवति ।

**गुणा**: -

- ✓ छात्र: विवेकेन ज्ञानं प्राप्नोति । एवं यथार्थस्य समीपे गच्छति । वास्तविकं ज्ञानं स्वाधीनतायाम् आनयति । तदर्थञ्च अन्विष्यति ।
- ✓ प्रत्यक्षप्रमाणम् अङ्गीकरोति ।
- ✓ स्वीयानुभवस्य प्राधान्यम् ददाति ।
- ✓ प्रत्यक्षजगद्सम्बद्धवास्तवं प्रति जानाति ।
- ✓ मनसि विद्यमानाया: अस्पष्टताया: दूरीकरणे प्रयत्न: क्रियते ।

**दोषा**:

- ✓ भौतिकजगत् यदि यथार्थ सत्ता भवति तर्हि सृष्टे: सीमा विचारणीया ।
- ✓ भौतिकजगत: अपेक्षया अन्य शक्ति: अस्ति वा नास्ति प्रश्न: उदेति ।
- ✓ यथार्थवादिन: केवलं सिद्धान्तं परिगणयन्ति। प्रभावोत्पादकविचारं प्रति न मन्यन्ते ।
- ✓ दैनिकजीवनस्यावश्यकताया: पुरणे एव सन्तुष्टा: भवन्ति न तु उदात्तजीवनाय ।

**उपयुक्तग्रन्थसूची**


1. Ancient Indian Education, F.K.Keny, Cosmo Publications, Darya Ganj, New Delhi, 1997
2. Examination in Ancient India, S. Narain with forceword by Prof. G Ram Reddy, Chairman, UGC, Newdelhi
3. उदीयमान भारतीय समाज में शिक्षा, डा. रामपाल सिंह वर्म, के. सुधा, विनोद पुस्तक मंदिर, आगरा